ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. X Apr,2017 - Sept,2017 No.1

वर्षम् – १०, अप्रेल २०१७ – सितम्बर २०१७, अङ्कः – प्रथमः

# प्राचीसुधा

# *PRACI SUDHA*

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

डॉ.विश्वनाथस्वाईँ

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

PURI, ODISHA

Scanned with CamScanner

# बाणस्तु पञ्चाननः

प्रो.अर्जना दुबे

शैलीदृष्ट्या संस्कृतकाव्यानां प्रकारत्रयमवाप्यते – गद्यकाव्यं, पद्यकाव्यं, चम्पूकाव्यञ्च । विभिन्नेषु छन्दसु निबद्धं काव्यं पद्यकाव्यमित्यभिधीयते । केवलं गद्येषु निबद्धा रचना गद्यकाव्यम् । गद्यपद्ययोः कृता च काव्यरचना चम्पूरित्यभिहिता । परञ्चैतेषु त्रिषु प्रकारेषु गद्ये रचना अतीव कठिना । यतो हि पद्येषु छन्दसां निबन्धनत्वात् समागतमपि स्खलनं तत्रैवान्तर्हितं भवति । पद्यानां गेयात्मकत्वात् तत्राकर्षणमपि सुकरम् । परञ्च गद्ये तथाविधं किमपि बन्धनं नास्ति । सर्वेषां भावानां प्रकाशानाय यथेप्सितपदानां प्रयोगस्य स्वातन्त्र्यं भवति । गेयात्मकतायाश्चाभावात् गद्ये सहृदयहृदयाकर्षणस्यैकमेव साधनमास्ते यत् कविः रसभावपात्रानुसारिण्याः, मनोगतसकलभावप्रकटसमर्थायाः पदावल्याः प्रयोगेण तथाविधं वाक्यं विन्यसेत् येन सहसा सचतेसां समाकर्षणं स्यात् । आत्मनि एतस्य गुणस्याधानाय कवेः काव्य-कला-केश-व्याकरणादि-विषयाणां गुणदोषालङ्कार-रसाभासभावादीनां दृढपरिचयेन सह शक्तिनिपुणताभ्यासाननाञ्चावश्यकता भवत्यपेक्षिता । पदे पदे वाग्वैचित्र्यमर्थगाम्भीर्यं भाववैभवं कल्पनाकाम्यत्वं च दुर्निवारम् । अतः साधूच्यते – "गद्यं कवीनां निकषं वदन्ति ।"

**बाणस्य कवित्वशक्तिः –**

गद्यकाव्यनिबन्धने कविवरो बाणोऽतिशेतेऽन्यान् सर्वानप्यभिरूपान् । दण्डी सुबन्धुश्चेति द्वावेतौ बाणेन समं सनामग्राहमुल्लेख्यौ । परं बाणो गरिष्ठो वरिष्ठश्च त्रयाणाम् एतेषां भूयिष्ठया मनोभावभिव्यक्त्या, साधिष्ठया शैल्या, मादिष्ठया, मनोहरतया, श्रेष्ठया साधुतया, प्रेष्ठया पदपरिष्कृता च ।

अतः सोड्ढलेन "वाणः कवीनामिह चक्रवर्त्ती" इत्युक्तम् । धर्मदासेन तरुणीलावण्यमस्य कृतौ दृश्यते । यथा –

रुचिर-स्वरवर्ण-पदा रसभाववती जगन्मनो हरति ।
सा किं तरुणी ? नहि नहि वाणी बाणस्य मधुरशीलस्य ।।[1]

सरस्वतीवीणाध्वनिरेव कृतिष्वस्य निशम्यते –

वीणापाणि-परामृष्ट-वीणानिक्वणहारिणीम् ।
भावयन्ति कथं वाऽन्ये भट्टबाणस्य भारतीम् ।।

Scanned with CamScanner

जयदेवो बाणं पञ्चबाणेन कामेनोपमिमीते । "हृदयवसतिः पञ्चबाणस्तुबाणः"। श्रीचन्द्रदेवोऽमुं कविकुञ्जरगण्डभेदकं सिंहं गणयति । आः सर्वत्र गभीरधीरकविता-विन्ध्याटवी चातुरी-संसारी कविकुम्भकुम्भिभिदुरो बाणस्तु पञ्चाननः ।

**बाणोच्छिष्टं जगत्सर्वम् –**

बाणस्य वस्तुविवृतौ वर्णने चापूर्वं वैशारद्यं वीक्ष्य मन्त्रमुग्धत्वमनुभवन्ति मनीषिणः । वर्ण्यस्य वस्तुनोऽणुतमामपि विवृतिं न विजहाति न किञ्चिदुज्झति परस्मै यत्तेन शक्यं वर्णयितुम् । वर्णनानां व्यपित्वात्, सर्वाङ्गीणत्वात्, सूक्ष्मतम-विवरणसमन्विततत्वाच्च "बाणोच्छिष्टं जगत्सर्वम्" इति भूयो भूयो व्यपदिश्यते ।

हर्षचरिते कवेर्वर्णनचातुरी बहुशोऽवलोक्यते । तेषु मुख्यत उल्लेख्याः प्रसङ्गाः सन्ति – मुमूर्षोर्नृपस्य प्रभाकरवर्धनस्य वर्णनं, वैधव्य-दुःखपरिहाराय सीतत्वमाश्रयन्त्या यशोवत्या वर्णनं, सिंहनादस्योपदेशः, दिवाकरमित्रस्य राज्यश्रीसान्त्वनम् । कवेर्गरिमा कमनीयां कादम्बरीमेवाश्रित्याऽवतिष्ठते इत्यत्र नास्ति विप्रतिपत्तिर्विदुषाम् । यत्र यत्र साङ्गोपाङ्गवर्णनं महता श्रमेण बाणेनोपस्थाप्यते, तेऽत्र प्रसङ्गा नामग्राहं दिङ्मात्रं प्रस्तूयते । तद्यथा – शूद्रकवर्णनं, चाण्डालकन्यावर्णनं, जाबालिवर्णनं, सन्ध्यावर्णनम्, उज्जयिनीवर्णनं, तारापीडवर्णनम्, इन्द्रायुधवर्णनं, राजभवनवर्णनम्, अच्छोदसरोवर्णनं, सिद्धायतनवर्णनं, महाश्वेतावर्णनं, कादम्बरीवर्णनञ्च ।

समासतः कानिचिदुदाहरणान्यत्र प्रस्तूयन्ते । सन्ध्यावर्णनं यथा – "अनेन च समयेन परिणतो दिवस स्नानोत्थितेन मुनिजनेनार्घविधिमुपपादयता य क्षितितले दत्तस्तम्बरतलगत साक्षादिव रक्तचन्दनाङ्गरागं रविरुदवहन् । ..... उद्यत्सप्तर्षि-सार्थस्पर्शपरिजिहीर्षयेव संहृतपाद पारावतचरणपाटरागो रविरम्बरतलादम्बत् ।[२]

प्रभातवर्णनं यथा – एकदा तु प्रभातसन्ध्यारागलोहिते........ चन्द्रमसि ....... सन्ध्यामुपासितुमुत्तराशावलम्बिनी, मानससरस्वतीरमिवावसति सप्तर्षिमण्डले .... इतस्ततः कलहंकोलाहले.... क्रमेण च गगनतलमार्गमवतरतो भगवति सवितरि ।[३]

कादम्बरीवर्णनं यथा – पृथिवीमिव समुत्सारितमहाकुलभूभृद्व्यतिकरां शेषभोगेषु निषण्णाम् कल्पतरुलतामिव कामफलप्रदां....... कादम्बरीं ददर्श।[४]

अच्छोदसरोवर्णनं यथा – प्रविश्य च तस्य तरुखण्डस्य मध्यभागे ...... तुषारगिरिमिव, विलीनम् चन्द्रातपमिव रसतामुपेतम्, हराट्टहासमिव जलीभूतम्....... मदनध्वजमिव आह्लादनं दृष्टे, अच्छोदं नाम सरो दृष्टवान् ।[५]

Scanned with CamScanner

जाबालिवर्णनं यथा –

स्थैर्यणाचलानां गाम्भीर्येण सागराणां तेजसा सवितुः प्रशमेन तुषाररश्मे-र्निर्मलतयाऽम्बरतलस्य संविभागमिव कुर्वाणम् ....... शरत्कालमिव क्षीणवर्षम् ..... जाबालिमपश्यम् ।[६]

वाणी बाणो बभूव ह – श्रीगोवर्धनाचार्यस्तु सूक्तिरियं सुधियां मोदमावहति यद् वाग्देवी सरस्वत्येव प्रागल्भ्यमधिकम् अवाप्तुं बाणरूपेण जनिं लेभे । उक्तं च –

जाता शिखण्डिनी प्राग् यथा शिखण्डी तथावगच्छामि ।
प्रागल्भ्यमधिकमवाप्तुं वाणी बाणो बभूव ह ।।[७] (गोवर्धनस्य) ।

बाणस्य कृतिद्वयं समीक्ष्यते चेत् तर्हि वाग्देव्या अवतारस्येव बाणस्य कला-कौशलं भाषामाधुर्यं रसप्रवाहश्च प्राप्यन्ते । वर्णनेषु प्रवाहो मनोज्ञत्वं च न क्वचिदपि न्यूनत्वमुपैति । तद्यथा – विलासवत्याः पुत्रहीनताजन्यविषादस्य वर्णनं, चन्द्रापीडं प्रेक्ष्य विलासिनीनां विलासवर्णनं, पुण्डरीकवलोक्य महाश्वेतायाः प्रेमोद्रेकवर्णनं, चन्द्रापीडं निरीक्ष्य कादम्बर्या मनोभाववर्णनं, पुण्डरीकनिधने महाश्वेतायाः कपिञ्जलस्य च विलापवर्णनं बाणस्य सूक्ष्मेक्षणं सहृदयत्वं सहानुभूतिप्रवणत्वं च परिचाययति ।

शुकनासोपदेशे कवेः प्रतिभायाश्चरमोत्कर्षो लक्ष्यते । तत्र कवेर्लेखनी भावोद्रेके प्रवहमाने नव प्रतीयते । शुकनासोपदेशे साक्षात् प्रतीयते यत् "वाणी बाणो बभूवह" ।

बाणः कवीनामिह चक्रवर्त्ती – बाणस्य कृतिद्वये प्रतिपदं प्रौढकवित्वदर्शनात् सोड्ढलेन बाणः कवीनामिह चक्रवर्त्ती इति समर्थ्यते । बाणस्य वर्णनेषु भावभाषयोः सामञ्जस्यं, भावानुकूलभाषाप्रयोगः, अलङ्काराणां सुसंयतो विनियोगः, भाषयाम् आरोहावरोहः दीर्घतरसमस्तपदावलीप्रयोगसमनन्तरमेव लघुपदावलीप्रयोगो विशेषतोऽवलोक्यते । शुकनासोपदेशेऽर्थगौरवत्वात् लघुपदप्रयोगे – मिथ्यामाहात्म्यगर्वनिर्भराश्च प्रणमन्ति देवताभ्यः, पूजयन्ति......... नाभ्युतिष्ठन्ति गुरून् ।[८]

महाश्वेताविलापे, कपिञ्जलकृत क्रन्दने च सन्ति लघूनि वाक्यानि । तद्यथा – कपिञ्जलकृतं रोदनम् – हा हतोऽस्मि, हा दग्धोऽस्मि.... हा सुरलोकशून्योऽसि ।[९]

जाबालिलघुपदविन्यासो यथा – प्रवाहकरुणरसस्य सन्तरणसेतुः संसारसिन्धोः, आधारः ....... उपदेष्टा सिद्धिमार्गस्य..... सखा सत्यस्य, श्रेयम्.... प्रभवः पुण्यसंचयस्य ।[१०] सर्वत्रैव वर्णने प्राग् विषयस्य साङ्गोपाङ्गनिरूपणं, ततश्च समासबहुलं

Scanned with CamScanner

वर्णनं ततश्च श्लेषमूला उत्प्रेक्षा, उपमाश्च, ततश्च विरोधाभासेन परिसंख्यालङ्कारेण वा समापनम् ।

परिसंख्या यथा शूद्रकवर्णने – यस्मिंश्च राजनि जितजगति पालयन्ति महीं चित्रकर्मसु वर्णसंकश, रतेषु केशग्रहा:, काव्येषु दृढबन्धा: शास्त्रेषु चिन्ता ।[११]

विरोदाभासो यथा शूद्रकवर्णने – आयतलोचनमपि सूक्ष्मदर्शनं, महोदोषमपि सकलगुणाधिष्ठानम् कुपतिमपि कलत्रवल्लभम्, अत्यन्तशुद्धस्वभावमपि कृष्णचरितम् ।[१२]

उपमा यथा विन्ध्याटवीवर्णने – चन्द्रमूर्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च जानकीव प्रसूलकुशलवा निशाचरपरिगृहीता च ।[१३]

उत्प्रेक्षा यथा सन्ध्यावर्णने – अपरसागराम्भसि पतिते दिनके पतनवेगोत्थितमग्य: सीकरनिकरमिव तारागणम्बरमधारयत् ।[१४]

श्लेषो यथा राजभवनवर्णने – उत्कृष्टकविगद्यामिव विविधवर्णश्रेणि प्रतिपाद्यमानाभिनवार्थसंयं, नाटकमिव.......... सुस्थितम् ।[१५]

एकावली यथा महाश्वेताजन्मवर्णने – क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन पदम् ।[१६]

श्लेषमूलासु उपमासु, विरोधाभासे, परिसंख्यायां च पाण्डित्यप्रदर्शनेन क्लिष्टत्वं दुर्बोधत्वं च परिलक्ष्यते । क्वचिद् वर्णनेषु तथाविधो विस्तारो यथा कृतेऽपि प्रयासे क्रियादप्राप्ति: सुदुर्लभा, महाश्वेतादर्शने प्रयुक्तं वाक्यं ६७ पंक्ति-विस्तृतम् । कादम्बरीदर्शने प्रयुक्तं वाक्यं तु विस्तृतं सत् ७२ पंक्ति-विशालतमम् अभजत् । विशेषणानां विशेषणानि, तदनु तेषामपि विशेषणानि गहनत्वम् आपादयन्ति, यत्र क्रियापदं विलुप्तमिव प्रतिभाति । कथाप्रवाहश्च निरुद्ध इव प्रतीयते वर्णनान्येतानि सहृदयहृदयावर्जकानि, परं कथाप्रवाहनिरोध: कथात्वं व्यावहन्ति ।

**बाणस्तु पञ्चानन:** – श्रीचन्द्रदेवो बाणस्तुतिम् आचक्षाणो बाणस्य विन्ध्याटवी-रूपसंस्कृतवाङ्मये निर्भीकत्वेन प्रतिद्वन्द्विकविदर्पलनेन, सर्वविषयावगाहिज्ञानसम्पन्नत्वेन रस-भाव-भाषालङ्कारप्रयोगवैदग्ध्येन अर्थगौरवान्वित्वेन, धन्वात्मकत्वेन च तस्य पञ्चाननत्वं सिंहत्वं वा प्रतिपादयति –

श्लेषे केचन शब्दगुम्फविषये केचिचद् रसे चापरेऽ-
लङ्कारे कातिचित्सदर्थविषये चान्ये कथा-वर्णने ।
आ: सर्वत्र गभीरधीरकविताविन्ध्याटवीचातुरी-
संचारी कवि कुम्भिकुम्भभिदुरा बाणस्तु पञ्चानन: ।।[१७]

श्रीचन्द्रदेवो विन्ध्याटवीवर्णनमाश्रित्यैव तस्य पञ्चाननत्वं व्याहरति वस्तुत: समग्रमपि तस्य वर्णनं भावगहनं गहनमिव हृदयम् अवगाहते । यथा विन्ध्याटवी-वर्णने समासभूयस्त्वस्य ओजोगुणस्य विरोधाभासस्य च सम्मिश्रणम् – "उन्मद-मातङ्गकपोलस्थलगलितमदसलिलसिक्तेनेव ....... पुष्पवत्यपि पवित्रा विन्ध्याटवी नाम ।"[१८]

ऋषेर्जाबालेर्वर्णने कलाया: कल्पनायाश्च हृद्यं सामञ्जस्यं दृश्यते – स्थैर्येणाचलानां गाम्भीर्येण सागराणां तेजसा सवितु:,....... जाबालिमपश्यम् ।[१९]

अच्छोदसरोरवरवर्णने सरसोऽच्छत्वमिव भाषाया: स्वच्छत्वमपि प्रेक्ष्यम् – तस्य तरुखण्डस्य मध्यमार्गे मणिदर्पणमिव त्रैलोक्यलक्ष्म्या......... निर्गमनमार्गमिव सागराणाम्............. अच्छोदं नाम सरो दृष्टवान् ।[२०]

हृदयवसति: पञ्चबाणस्तु बाण: – प्रसन्नराघवकारो जयदेवो बाणं कविता-कामिनी-मनोमन्दिरवासिनं साक्षात् कामदेवमेव मनुते । तस्य कविताकामिनी सर्वमनोमोहिनी, सर्वचित्ताकर्षिकाच्यते च –

हर्षो हर्षो हृदयवसति: पञ्चबाणस्तु बाण: ।
केषां नैषा कथय कविता कामिनी कौतुकाय ।।[२१]

बाणो रससिद्ध: कवीश्वर: । शृङ्गाररसोऽस्य प्रेष्ठो रस: । स संभोग-विप्रलम्भ-पक्षद्वयं वर्णने समरूपेण दक्ष: । सम्भोगशृङ्गारवर्णनापेक्षया विप्रलम्भवर्णने तस्य लेखनी प्रवाहमधुरा प्रचारचतुरा च । महाश्वेता कादम्बरी च स्वप्रियतमं प्रेक्ष्य कथमिव व्याकुलतां भजत:, कथं प्रेमाङ्कुरोदय:, कथं विकास: पल्लवितत्वं पुष्पितत्वं चेति एतस्य मनोवैज्ञानिकविश्लेषणं तस्य कवितमत्वं पञ्चबाणत्वं च साधयति यथा –

अनन्तरं च मेऽन्तर्मदनावकाशमिव दातुमाहितसंताना निरायु: श्वासमारूत: । साभिलाषां हृदयमख्यातुमिव स्फरितंमुखमभूत् कुचयुगलम् । स्वेदसलिललवलेखाशालितेवागलल्लज्जा ।[२२]

महाश्वेतावर्णने तस्यां यौवनप्रवेशस्य एकावलीमूलकं वर्णने कथामिव मानेज्ञताम् उद्वहति – क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, नवयौवने न पदम् ।"[२३]

हर्षचरिते मातुर्यशोवत्या हर्ष प्रत्युक्ति: भावभाषाप्रसादादिगुणै: सर्वथा हृदयं द्रावयति –

वत्स, नासि न प्रियो निर्गुणो वा परित्यागार्हो वा स्तन्येनैव सह त्वया पीतं मे सहृदयम् । कुलकलत्रमस्मि चारित्रधना धर्मबले कुल जाता । वीरजा वीरजाया वीरजननी च मादृशी पराक्रमक्रीता कथमन्यथा कुर्यात् ।[२४]

कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते – बाणभट्टस्य सर्वोत्कृष्ट विशेषता तस्योदात्तवर्णनप्रणाली । अस्य रचनासु सर्वत्र नवीनता सरसता चावलोक्यते । क्वचिदपि अर्थानां भावानं वा पिष्टपेषणं न दरीदृश्यते ।

स्वरचनासु बाणेन पाञ्चलीरीतिरेवाश्रिता । यस्याम् अर्थस्यानुरूपमेव शब्दानां गुम्फनो भवति –

शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरिष्यते ।
शिलाभट्टारिका वाचि बाणोक्तिषु च सा यदि ।। (सरस्वतीकण्ठभरणम्)

बाणः पाञ्चालीरीतेर्मूर्धन्यः कविः । अत्र भाव-भाषयोः सामञ्जस्यमपेक्ष्यते । भावानुकूला भाषा, रसानुकूला च भाषा, एवं भाषाया भावस्य च समन्वये क्वचित् समासबहुला पदावली, क्वचित् समासरहिता प्रसादमाधुर्यगुण सालंकृता च पदपङ्क्ति ।

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ।। (हर्षचरितम् – १८)

इत्यनेन कवेरभीष्टं निर्दिश्यते यत् स स्वीये काव्ये अर्थगौरवं रसपरिपाकम् ओजोगुणयुतं शब्दसंयोजनं चाकांक्षति । अत एव क्वचिद् ओजो गुणः, क्वचिद् रसानुकूलं वर्णनं, क्वचिदर्थगौरवञ्च परिलक्ष्यते । बाणस्य वर्णनशैली तथा सुमधुरा रसप्रधाना गुणवती यथा एकदा कादम्बरी पठने प्रवृत्तौ मानवाः । स्वाहारमपि न रोचते । कथायां तथौत्सुक्यं विस्मयत्वं च यथा परिणाम जिज्ञासुर्जनो न पाठ निरुन्धो चन्द्र एवं चन्द्रापीड शूदकश्च, पुण्डरीक एव वैशम्पायनः शुकश्च, लक्ष्मीरेव चाण्डालकन्येति को विश्वसितुं पारयति । एतदद्भुत्वमेव कादम्बर्या रोचकत्वं वर्धयति । केचन हृद्याः प्रसङ्गा अत्रोपसन्थाप्यन्ते ।

विकटविन्ध्याटवीवर्णने विकटशब्दानां समासानां च बाहुल्यमवलक्यते – क्वचित्प्रलयवेलेव महावराहदंष्ट्रसमुत्खातधणणिमंडला, क्वचिदुद्वृत्तगपतिनादभीतेप कण्डकिता..... ।[२५]

वसन्तर्तुवर्णने कोमलकान्तपदावल्याः समन्वयो लक्ष्यः – कोमलमलयमारुतावतारतरङ्गितानङ्गध्वजांशुकेषु.... मधुकरकुलकलङ्काली-कृतकालेयकुसुमकुड्मलेषु....... मधुमासदिवसेषु ।[२६]

सन्ध्यावर्णने उत्प्रेक्षाणां माधुर्यं यथा – क्वापि विहृत्य दिवसावसाने लोहिततारका तपोवनधेनुरिव कपिला परिवर्तमाना सन्ध्या मुनिभिरदृश्यत । अपराम्भसि पतिते दिनकरे.............. अम्भः सीकरनिकरमिव तारागणम्, अम्बरम् अधारयत् ।[२७]

शुकनासोपदेशे विरोधाभासमूलकं लक्ष्मीस्वभाववर्णनम् । यथा – "उन्नतिमादधानपि नीचस्वभावताम् आविष्करोति । अमृतसहोदरापि कटुकविपाका । विग्रहवत्यपि अप्रत्यक्षदर्शना । पुरुषोत्तमरताऽपि खलजनप्रिया ।[२८]

शुकनासोपदेशे प्रसादगुणोदेता पदावली यथा – न परिचरं रक्षति नाभिजनमीक्षते । न रूपमालोक्यते । न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति ।[२९]

निष्कर्षरूपेण कथ्यते यत् बाणेन समोऽन्यो कविः न बभूव । यैः गद्यकारैः प्रयासो कृतः ते सर्वे असमर्था बभूवुः । त्रिलोचनमहोदयानुसारमपि –

हृदि लग्नेन बाणेन मन्मदोऽपि पदक्रमः ।
भवेत्कविकुरगाणां चापलं तत्र कारणम् ।। (शार्ङ्गधरपद्धतौ) । इति ।

---

**सन्दर्भसूची –**


१. संस्कृतनिबन्धशतकम् – पृ.१३८ ।
२. कादम्बरी (पूर्वभागः)– पृ.१४७-१४८ ।
३. तत्रैव – पृ.७८-८२ ।
४. तत्रैव – पृ.४६७-४६९ ।
५. तत्रैव – पृ.३७९-३८९ ।
६. तत्रैव – पृ.१३४-१३५ ।
७. संस्कृतनिबन्धशतकम् – पृ.१३३ ।
८. कादम्बरी (पूर्वभागः)– पृ.३४२ ।
९. तत्रैव – पृ.१४०-१४१ ।
१०. तत्रैव – पृ.४६७-४६९ ।
११. तत्रैव – पृ.१६-१७ ।
१२. तत्रैव – पृ.२९ ।
१३. तत्रैव – पृ.५८ ।
१४. तत्रैव – पृ.१४९-१५० ।
१५. तत्रैव – पृ.२८०-२८३ ।


Scanned with CamScanner

१६. तत्रैव – पृ.४२६ ।
१७. संस्कृतनिबन्धशतकम् – पृ.१३४ ।
१८. कादम्बरी (पूर्वभागः) – पृ.५६-६१ ।
१९. तत्रैव – पृ.१३४-१३५।
२०. तत्रैव – पृ.३७९-३८४।
२१. संस्कृतनिबन्धशतकम् – पृ.१३५ ।
२२. कादम्बरी (पूर्वभागः) – पृ.१३५ ।
२३. तत्रैव – पृ.४२६ ।
२४. संस्कृतनिबन्धशतकम् – पृ.१३५ ।
२५. कादम्बरी (पूर्वभागः) – पृ.४९-६० ।
२६. संस्कृतनिबन्धशतकम् – पृ.१३६ ।
२७. कादम्बरी (पूर्वभागः) – पृ. १४९-१५० ।
२८. तत्रैव – पृ.३३१ ।
२९. तत्रैव – पृ.३२७-३२८।

—o—

सोमनाथसंस्कृतविश्वविद्यालयः, राजेन्द्रभुवनरोड, वेरावल,
जिला-गीरसोमनाथ, गुजरात – ३६२२६५

Scanned with CamScanner